Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# याज्ञवल्क्योक्तदिशा विघ्नोपशान्त्यर्थं कर्मविधानम्

**Dr. Priti Pareswari Mohanty**
**Assistant Professor, Departmet of Dharmashastra, Rajkiya Sanskrit Mahavidyalaya, Bhagalpur, Bihar, India**

**Article Info**
Volume 5, Issue 3
Page Number : 161-164
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 30 May 2022

***सारांशः*** *- विनायकोपसृष्टो जनः विक्षिप्तचित्त इव भवति तथानुष्ठितकार्यस्य फलं न प्राप्नोति। कारणं विनैव दुःखी भवति। शौर्यादिसम्पन्नोऽपि राजनन्दनः न राज्यं लभते। कन्या पतिम्, ऋतुमती गर्भम्, गर्भवती चापत्यं न प्राप्नोति। श्रुताध्ययनसमन्नोऽपि श्रोत्रियः आचार्यत्वं तथा शिष्योऽध्ययनं नाप्नोति। वणिक् व्यापारे लाभं तथा कर्षकश्च कृषिफलं न प्राप्नोति। तदर्थं विनायकोपसृष्टो जनस्य विघ्नोपशान्त्यर्थं याज्ञवल्क्येन यत् कर्मविधानं कृतं तदत्र मया उपस्थाप्यते।*

---

जडचैतन्यमयं जगदिदं चतुर्दशभुवनेष्वतीवमनोहरं वैचित्रपूर्णञ्च। रहस्यावृतब्रह्माण्डान्तर्गतं जगदिदमत्यद्भुतम्। नित्यनियतपरिवर्तमाने संसारेऽस्मिन् नानाजीवेषु श्रेष्ठजीवानां निवासस्थानं तु समाज एव। तेषां सामाजिकानां सुष्ठुजीवनयापनार्थं समाजस्य गौरवरक्षार्थं च समाजसंस्थापका वेदज्ञा मन्वादिधर्मशास्त्रकाराः समाजशास्त्ररूपस्य धर्मशास्त्रस्य प्रणयनं कृतवन्तः। मूलतः सामाजिकानां विहितकर्म धर्मनाम्नैव शास्त्रेऽस्मिन् दरीदृश्यते। अतः शास्त्रस्यास्याऽपरं नाम समाजशास्त्रमित्यपि कथ्यते।

तत्र युगानुसारेण देशानुसारेण पारिपार्श्विकस्थित्या च सामाजिक-सांस्कृतिक-राजनीतिक-अर्थनीतिक-धार्मिकपरिवेशः स्वतः परिवर्तनशीलो लक्ष्यते। तस्मादेव कारणात् शैलीभेदेन धर्मशास्त्रसाहित्यस्य वाङ्मयं चतुर्धा विभक्तम्। तद्यथा- स्मृतिसाहित्यम्, सूत्रसाहित्यम्, भाष्यसाहित्यम्, निबन्धसाहित्यम्। गौतमादिधर्मसूत्रेषु सूत्राकारेण स्मृतिसाहित्ये मन्वादिस्मृतीनां श्लोकाकारेण, भाष्यसाहित्ये व्यख्याकारेण निबन्धसाहित्ये गद्याकारेण च विषयवस्तूनामुपस्थापनं दृश्यते। अतो वक्तुं शक्यते यत् जनानां रुच्यनुगुणं समाजस्यावश्यकतानुसारेण मानवानां हितसाधनाय कालानुसारेण धर्मशास्त्रसाहित्यस्यैतादृशं चतुर्धा विभाजनं परिलक्ष्यते।

यद्धवतु तत्र मन्वादिप्रमुखस्मृतिग्रन्थेषु याज्ञवल्क्यस्मृतिः अन्यतमः। स्मृतेरयं प्रवर्तको भवति महर्षियाज्ञवल्क्यः। आचार-व्यवहार-प्रायश्चित्तात्मकाऽध्यायत्रयेण विभाजितायां याज्ञवल्क्यस्मृतौ सहस्राधिकाः श्लोकाः विद्यन्ते। तत्र आचाराध्याये उपोद्घात-ब्रह्मचारी-विवाह-वर्णजाति-गृहस्थ-स्नातक-भक्ष्याभक्ष्य-द्रव्यशुद्धि-दान-श्राद्ध-गणपतिकल्प-ग्रहशान्ति-राजधर्मादि त्रयोदशप्रकरणानि सन्ति। एतेषु गणपतिकल्पप्रकरणम् उल्लेखनीयम्। तत्र विघ्नोपशान्त्यर्थं कर्मविधानं याज्ञवल्क्येन कृतम्। तद्विषये अधुना उपस्थाप्यते।

ब्रह्मा-विष्णु-महेश्वरः जगतस्य स्रष्टा-पालक-विनाशककर्ताः त्रिमूर्त्तयः विघ्नेश्वराय विनायकाय कर्माणां विघ्नसिद्ध्यर्थं च नियोजितः। विनायकोपसृष्टो जनः विक्षिप्तचित्त इव भवति। तस्य लक्षणप्रसङ्गे [1]याज्ञवल्क्येनोक्तं यत्-

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत।**
**स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति।।**
**काषायवाससश्चैव क्रव्यादांश्चाधिरोहति।**
**अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते।।**
**व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः। इति।**

तत्र विनायकोपसृष्टो जनः अनुष्ठितकार्यस्य फलं न प्राप्नोति। कारणं विनैव दुःखी भवति। शौर्यादिसम्पन्नोऽपि राजनन्दनः न राज्यं लभते। कन्या पतिम्, ऋतुमती गर्भम्, गर्भवती चापत्यं न प्राप्नोति। श्रुताध्ययनसमन्नोऽपि श्रोत्रियः आचार्यत्वं तथा शिष्योऽध्ययनं नाप्नोति। वणिक् व्यापारे लाभं तथा कर्षकश्च कृषिफलं न प्राप्नोति।[2]

तदर्थं विनायकोपसृष्टो जनस्य विघ्नोपशान्त्यर्थं याज्ञवल्क्येन कर्मविधानं कृतं [3]तद्यथा-

**स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकम्।**
**गौरसर्षपकल्केन साज्येनोत्सादितस्य च।।**
**सर्वौषधैः सर्वगन्धैर्विलिप्तशिरसस्तथा।**
**भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः।।**

अर्थात् विनायकोपसृष्टस्य पुरुषस्य शुभदिने विधिपूर्वकम् अभिषेचनं कर्त्तव्यम्। घृतमिश्रितेन गौरसर्षपपिष्टेन शरीरम् उद्वर्त्तितव्यम्। प्रियङ्गु-नागकेसर-चन्दन-अगुरु-कस्तूरिप्रभृतिभिः शिरस उपलेपनं कार्यम्। ततश्च भद्रासनोपविष्टस्य पुरुषस्य श्रुताध्ययनसम्पन्नाः शोभनाकृतयः चत्वारः ब्राह्मणाः स्वस्तिवाचनं कुर्युः।

किञ्च अश्वस्थानात्, गजस्थानात्, वल्मीकात्, सरित्सङ्गमात्, देवखातात् च आहृतां पञ्चविधां मृत्तिकां गोरोचनं चन्दन-कुङ्कुम-अगरुप्रभृतीन् गुग्गुलञ्च समानवर्णैः चतुर्भिः कलशैः ह्रदात् संगमाद्वा समानीताः अप्सु विनिक्षिपेत्। तदनन्तरं लोहितवर्णे आनडुहे चर्मणि भद्रासनं संस्थापनीयम्। प्राप्यते यत् [4]याज्ञवल्क्यस्मृतौ-

**अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्।**
**मृत्तिकां रोचनां गन्धान्गुग्गुलं चाऽप्सु निक्षिपेत्।।**
**या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्।**
**चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः।।**

तस्मिन् भद्रासने उपविष्टस्य स्वस्तिवाच्या द्विजाः। किंच, स्वस्तिवाचन अनन्तरं जीवत् पतिपुत्राभिः रूपगुणशालिनीभिः सुवेषाभिः कृतमङ्गलं पूर्वदिग्देशावस्थितं कलशम् आदाय त्वां विनायकोपसृष्टं 'सहस्राक्षं........ पुनन्तु ते' इति मन्त्रेण गुरुः अभिषेकं कुर्यात्।[5]

तदनन्तरं दक्षिणदेशावस्थितं [6]द्वितीयं कलशम् आदाय 'भगं ते ..... सप्तर्षयो ददुः' इति मन्त्रेण गुरुः अभिषेकं कुर्यात्। ततः [7]तृतीयं कलशम् आदाय 'यत्ते केशेषु ......... घ्नन्तु सर्वदा' इति मन्त्रेण गुरुः अभिषेकं कुर्यात्। ततः [8]चतुर्थ कलशम् आदाय पूर्वोक्तैः त्रिभिः मन्त्रैः अभिषिञ्चेत्। 'सर्वमन्त्रैः चतुर्थम्' इति मन्त्र लिङ्गात्। उक्तेन प्रकारेण अभिषिक्तस्य सव्यपाणिगृहीत कुशान्तर्हिते शिरसि औदुम्बरस्रुवेण सार्षपं तैलं मितादीनि विनायकस्य षण्नामान्ते स्वाहाशब्दं संयुज्य आदौ प्रणवमुच्चार्य अर्थात् 'ओं मिताय स्वाहा, ओं सम्मिताय स्वाहा, ओं शालाय स्वाहा, ओं कटङ्कटाय स्वाहा, ओं कूश्माण्डाय स्वाहा, ओं राजपुत्राय स्वाहा' इति षड्भिः मन्त्रैः जुहूयात् आचार्यः। तदनन्तरं लौकिकेऽग्नौ स्थालीपाकविधिना

चरुं श्रपयित्वा एतैरेव षड्भिर्मन्त्रैः तस्मिन्नेव अग्नौ होमं कुर्यात्। ततश्चान्ते होमावशिष्ट चरुणा इन्द्राग्नियमादि देवानाम् उद्देश्ये 'ओं इन्द्राय नमः, ओं अग्नये नमः, ओं यमाय नमः' इत्यादि मन्त्रैः बलिं दद्यात्। यथोक्तं [9]याज्ञवल्क्येन-

**मितश्च समितश्चैव तथा शालकटङ्कटौ।**
**कूश्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः।।**
**नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः। इति।**

तदनन्तरं कृताकृतादि उपहारद्रव्यजातं विनायकस्य उपाहृत्य संनिधानात् तत् जनन्याश्च शिरसा भूमिं गत्वा – 'तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्' इत्यनेन मन्त्रेण विनायकं, तथा 'सुभगायै विद्महे काममालिन्ये धीमहि। तन्नो गौरी प्रचोदयात्' इत्यनेन मन्त्रेण अम्बिकां च नमस्कुर्यात्। तत्र शूर्पे सर्वतः कुशान् आस्तीर्य सकृदवहतान् तण्डुलान्, तिलपिष्टमिश्रितम् ओदनम्, पक्वान् अपक्वान् मत्स्यान्, पक्वापक्वं मांसम्, रक्तपीतादिनानावर्ण्यं पुष्पम्, सुगन्धम् चन्दनादिकं, त्रिविधामपि सुराम्, मूलकं, पूरिका, अपूपान्, एवमेव पिष्टमयी मालाम्, दधिमिश्रितम् अन्नम्, पायसम्, गुडमिश्रितं पिष्टम्, लड्डुकादिसहितम् एतान् सर्वान् समाहृत्य चतुष्पथे दद्यात्। प्रसङ्गेऽस्मिन्नुक्तं यत् [10]याज्ञवल्क्येन-

**दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः।**
**कृताकृतांस्तण्डुलांश्च पललौदनमेव च।**
**मत्स्यान्पक्वांस्तथैवमान्मांसमेतावदेव तु।।**
**पुष्पं चित्रं सुगन्धं च सुरां च त्रिविधामपि।**
**मूलकं पूरिकापूपांस्तथैवोण्डेरकस्रजः।।**
**दध्यन्नं पायसं चैव गुडपिष्टं समोदकम्। इति।**

तदन्तरं शिरः भूमौ कृत्वा विनायकस्य जननीम् अम्बिकाम् अर्घ्यं प्रदाय, दूर्वा-सर्षपपुष्पाणां पूरितम् अञ्जलिं निवेद्य उपस्थानं कुर्यात्। तत्र उपस्थानमन्त्रविषये [11]याज्ञवल्क्येन उक्तं यत्-

**रूपं देहि यशो देहि भगं भवति देहि मे।**
**पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे।। इति।**

अर्थात् उपस्थान अनन्तरं प्रार्थयते हे भगवति! रूपं, यशः, ऐश्वर्यं, सत्पुत्रान्, धन-धान्यं तथा सर्वकर्मानुष्ठानफलं प्रदेहि। ततश्च शुभ्रवस्त्रादिकं धारयित्वा ब्राह्मणान् भोजयेत्। आचार्यान् अपि वस्त्रयुग्म-दक्षिणादिना सत्कुर्यादिति[12]।

**निष्कर्षः** - एवं विनायकम् आदित्यादिग्रहांश्च सम्पूज्य अनुष्ठितानुष्ठीयमानानां च कार्याणां सम्यक् फलं प्राप्नोति जनः तथा सर्वोत्कृष्टम् ऐश्वर्यमपि प्राप्नोति। तस्माद् एतेषां पूजनम् अवश्यमेव कर्त्तव्यम्। अतः यः भगवतः सूर्यस्य तथा स्कन्दस्वामिन एवं गणपतेश्च प्रतिमां निर्माय प्रतिदिनं यथाविधि पूजनं करोति, स नित्यकाम्य उभयविधं फलं प्राप्नोति इति।[13]

---

**सन्दर्भसूची-**

[1].याज्ञवल्क्यस्मृतिः – 1/272-274½

[2].विमना विफलारम्भः संसीदत्यनिमित्ततः।

तेनोपसृष्टो लभते न राज्यं राजनन्दनः।
कुमारी च न भर्तारमपत्यं गर्भमङ्गना।।
आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा।
वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः।। इति।
याज्ञवल्क्यस्मृतिः – 1/274½ - 276

[3].तत्रैव – 1/277-278

[4]. तत्रैव – 1/279-280

[5]. तत्रैव – 1/281

[6]. तत्रैव – 1/282

[7]. तत्रैव – 1/283

[8]. तत्रैव – 1/284

[9]. तत्रैव – 1/285-286½

[10]. तत्रैव – 1/286½ -289½

[11]. तत्रैव – 1/291

[12]. तत्रैव – 1/292

[13]. तत्रैव – 1/293-294

**सहायकग्रन्थः –**

याज्ञवल्क्यस्मृतिः – सम्पादकः डॉ. गङ्गासागरराय, चौखम्बा संस्कृत प्रतिष्ठान,
दिल्ली, 2007